# श्रीमद् दादू दर्शन (जीवब्रह्मविचार:)

**डॉ. दयाराम स्वामी**
वरिष्ठ मनोरोग विशेषज्ञ
सदस्य - संचालन समिति, श्री दादू महाविद्यालय, जयपुर

महात्मा दादू मायातीतस्य निर्गुणस्य निरंजनस्य रामस्योपासको न तु मायाशबलितस्य सगुणस्य रामस्य। स स्वकीये दादूवाणीनामके ग्रन्थे स्पष्टमाह तत्। तद्यथा -

**'मायारूपी राम को सब कोई ध्यावै।**
**अलख आदि अनादि है सो दादू गावै।।'**

अर्थात् - 'मायाशबलितं रामं ध्यायन्ति सकला जनाः। अलक्ष्योऽनादिरादिर्यो दादू गायति तं प्रभुम्।' अत एव मंगलपद्येऽपि श्री दादू निरञ्जनं रामं ब्रह्मापरपर्यायं नमस्करोति 'दादू नमो नमो निरञ्जनम् इति कथयन्। अन्यत्रापि बहुत्र पदभागे एतादृशमेव तत्त्वमाराध्यत्वेन प्रतिपादयति। तद्यथा-

**''ऐसा तत्त्व अनूपम भाई। मरै न जीवै काल न खाई।।**
**पावक जरै न मारा मरई। काटा कटै न टारा टरई।। 1।।**
**अक्खर खिरै न लागै काई। शीत घाम जल डूब न जाई।। 2।।**
**माटी मिटै न गगन बिलाई। अघट एकरस रह्या समाई।।3।।**
**ऐसा तत्त्व अनूपम कहिए। सो गहि दादू काहू न रहिए।।4।।''**

ब्रह्माभिन्नस्य निरञ्जनस्य रामस्यैतादृशमेव रूपं वेदान्तेष्वपि प्रतिपादितम्। यथा - 'यत्तद्देश्यमग्राममगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादम्' इत्यादि। अपि च, ।

**'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।'**

(कठोपनिषद्)

**एषो नित्यो महिमा ब्रह्मणोऽस्य न कर्मणा वर्धते न कनीयान्।**
**तस्यैव स्यात्पदविज्ञं विदित्वा न कर्मणा लिप्यते पापकेन।।'**

(बृहदारण्यक)

भगवद्गीतायामपि -

**''नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।**
**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।।**

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।'